National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2016; 1(4): 25-29
© 2016 NJHSR
www.sanskritarticle.com

**डा.चक्रवर्तिरङ्गनाथः**
उपाचार्यः,साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,तिरुपतिः

**Correspondence:**
**डा.चक्रवर्तिरङ्गनाथः**
उपाचार्यः,साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,तिरुपतिः

# भगवद्गीतायाम् अलङ्कारपरामर्शः

**डा.चक्रवर्तिरङ्गनाथः**

### वेदव्यासपरिचयः-

वेदानां विभागः अनेन कृतः इत्यतः वेदव्यासः इति एतस्य नाम । द्वीपे अस्य जन्म अभवत् इत्यतः 'कृष्णद्वैपायनः' इत्यपि नामान्तरम्। व्यासस्य शैली अपि वाल्मीकेः इव सरला एव। भगवान् वेदव्यासः महर्षेः पराशरस्य पुत्रः। एषः जनानां स्मरणशक्तेः क्षीणतां दृष्ट्वा वेदानां ऋग्वेदः, यजुर्वेदः, सामवेदः, इत्यादिरूपेण विभजनमकरोत्। अष्टादशपुराणानि, महाभारतस्य रचनाम् एषः एव अकरोत् ।

### महाभारतम्-

महाभारतं लक्षश्लोकात्मकः विस्तृतः ग्रन्थः । भगवद्गीता हरिवंशः विष्णुसहस्रनामम् इत्यादयः प्रसिद्धाः ग्रन्थाः। आध्यात्मिकचैतन्योद्दीपकाः अस्मिन्नेव महाभारते अन्तर्भवन्तीति सुविज्ञायते एव।

### श्रीमद्भगवद्गीता-

श्रीमद्भगवद्गीताख्यं शास्त्रं वैदिकवाङ्मये सम्पूर्णवेदस्थानीयमिति शास्त्रविदां मतम् । वेदवत् त्रिकाण्डात्मकत्वात्,समस्तवेदार्थ सारसंग्रहभूतत्वात्, सर्वशास्त्रमयत्वात्, सर्वसाधारणलोकोपकार-कत्वाच्च । प्रसिद्धिश्चैतादृश्येव –

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥**
**सर्वोपनिषदो गावो**
**पार्थो वत्सः सुधीर्भोक्ता गीतामृतदुहे नमः[1]॥**

वासुदेव-पार्थयोः संवादरूपायाः गीताया अवसाने अर्जुन उवाच— [2]"नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत । स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव" । अनेन मोहनाशः जातः यत् तदेव प्रश्नप्रतिवचनेन प्राप्तं सर्वशास्त्रार्थज्ञानफलमेत-दिति निश्चितं दर्शितं भवति । यतो ज्ञानान्मोहनाश आत्मस्मृतिलाभश्चेति । तथा च श्रुतावनात्मविच्छोचामीत्युपन्यस्यात्मज्ञानेन सर्वग्रन्थिविप्रमोक्ष उक्तः भिद्यते हृदयग्रन्थिस्तत्र को मोहः कः शोकः एकत्वमनुपश्यतः इति च मन्त्रवर्णः । एतस्याः गीतायाः शास्त्रत्वे भगवतः स्ववचनमेव प्रमाणम्-

**इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।**
**एतद्बुध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत [3] ।**

### गीतायाः महत्वम्

**सर्वशास्त्रमयी गीता सर्ववेदमयो हरिः।**
**सर्वतीर्थमयी गङ्गा सर्ववेदमयो मनुः।।**
**एकं शास्त्रं देवकीपुत्रगीतम् एको देवो देवकीपुत्र एव।**
**मन्त्रोऽप्येकः तस्य नामानि यानि कर्माप्येकस्तस्य देवस्य सेवा।।**
**गीता गङ्गा च गायत्री गोविन्देति हृदि स्थिते।**
**चतुर्गकारसंयुक्ते पुनर्जन्म न विद्यते4।।**

**भगवद्गीता स्वरूपम्-**

**षट्शतानि सविंशानि श्लोकानां प्राह केशवः।**
**अर्जुनः सप्तपञ्चाशत् सप्तषष्टिं तु सञ्जयः।**
**धृतराष्ट्रः श्लोकमेकं गीताया मानमुच्यते[5]।।**

अष्टादशाध्याययुता गीता- अधुना सप्तशतश्लोकैः विराजमाना अस्ति। पूर्वं तावत् पञ्चचत्वारिंशदधिकप्रमाणभूतः श्लोकः एव महाभारतात् उद्धृतोऽस्ति। अत्र धृतराष्ट्रस्य-सञ्जयस्य-अर्जुनस्य-भगवतः श्रीकृष्णस्य च मुखारविन्देभ्यः समागतश्लोकसूची प्रदत्ता अस्ति।यथा- षट्शतानिसविंशानि-620श्लोकाः।अर्जुनः सप्तपञ्चाशत्-57। सप्तषष्टिं तु सञ्जयः67 धृतराष्ट्रः श्लोकमेकः1आहत्य-745 इयं गीता 350 भाषासु अनूदिता प्रपञ्चे।।

**भगवद्गीता एकमुत्तमं काव्यम्-**

वस्तुतःभगवद्गीता एकमुत्तमं काव्यं भवति। यत्र च कविः साक्षात् भगवान् श्रीमन्नारायणः श्रीकृष्ण एव। वस्तुतः कवि शब्दः भगवति एव आदौ प्रयुक्तोऽस्ति। **कविं पुराणमनुशासितारम् कविर्मनीषी परिभू स्वयम्भूः।।** इत्यादि रूपेण। काव्यस्य लक्षणानि बहुप्रकाराणि सन्ति। तदत्र न विचार्यते। किन्तु काव्यस्य किं प्रयोजनमिति चेत्। मम्मटाचार्यः-

**काव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेश युजे[6]।।**

काव्यस्य परमं प्रयोजनं भवति-सदुपदेशः। स च अस्मात् गीताग्रन्थात् लभ्यते किल। एवमेव यशसे-अर्थकृते एतद्वयमपि स्पष्टमेव। शिवेतरक्षतिः – अमङ्गलनाश अपि अस्मात् भवत्येव। तदस्माभिः गीतामाहात्म्याश्लोकैः ज्ञातमेव।**सद्यः परनिर्वृतिः-** गीतायाः पठनेन न लौकिकानन्दः, अपि तु अलौकिकः आनन्दोऽपि सञ्जायते। स तु अनुभवैकवेद्य एव। तदनु उपदेशयुजे-नाम युक्तोपदेशाय। यस्य ग्रन्थस्य पठनेन समाजे चेतनता, मनुष्येषु उत्साहादिकं विवर्धते, तदेव काव्यं भवति।सर्वैः पुरुषार्थचतुष्टयप्राप्तये यतनीयमिति वैदिकं वचः। तदस्मात् प्राप्तये एव। अत एवोक्तं

**चतुर्वर्गफलप्राप्तिः सुखात् अल्पधियामपि।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।। इति ।तथैव-**
**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
**करोति कीर्तिं प्रीतिं च साधु काव्यनिषेवणम्[7]।।इति**

यद्यप्यियम् अध्यात्मग्रन्थरूपेण विराजते।तथापि काव्यलक्षणविभूषिता विद्यते। यतो हि काव्यतत्वानि कानि इति जिज्ञासायां-

**रसप्रधानाः शब्दार्थाः गुणालङ्कारवृत्तयः।**
**रीतयश्चेयती शास्त्रप्रमेयं काव्यपद्धतिः[8]।।**

इति लक्षणसत्वात्, प्रायः सर्वेऽपि काव्यप्रमेयाः अस्यां गीतायां द्रष्टुं शक्याः इति मेऽभिप्रायः। एतदर्थमेवायं प्रयासः। अन्येप्यत्र प्रयत्नं कर्तुं समर्थाः एव।

वेदशास्त्रविमुखानां कृते काव्यमत्यन्तमुपादेयं भवति। विश्वनाथकविरायः वदति-**न हि कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्[9]** इति। अतः भगवद्गीता –सरला- सुबोधा- आह्लादकरी- सुखकरी- मोक्षकरी- च विद्योतते। यस्याः श्रवणमात्रेणैव जनाः दुःखं परित्यज्य सुखसागरे निमग्नो भवन्ति। अतः इयं काव्यमेव भवति

**वदति कश्चित् कविः-**

**स्वादु काव्यरसोन्मिश्रं शास्त्रमप्युपयुज्यते।**
**प्रथमालीदमधवः पिबन्तु कटु भेषजम्।।**

इयं भगवद्गीता कथं काव्यत्वेन निरूप्यते इति चेत् भरतमुनेः नाट्यशास्त्रे विद्यमानैः श्लोकैः निरूपयितुं शक्यन्ते।

**धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम्।**
**निग्रहो दुर्विनीतानां विनीतानां दमक्रिया।।**
**क्लीबानां धार्ष्ट्यजननम् उत्साहः शूरमानिनाम्।**
**अबुधानां विबोधश्च वैदुष्यं विदुषामपि।**
**धर्मं यशस्य मायुष्यं हितं बुद्धिविवर्धनम्।**
**वेदविद्येतिहासानामाख्यानं परिकल्पनम्[10]।। इत्यादिरूपेण।**

धार्मिक-नैतिक-सामाजिक-सांस्कृतिकव्यवहारिकज्ञानशिक्षां यस्मात् ग्रन्थात् प्राप्नुमः। सः काव्यशब्दवाच्यः भवति। भगवद्गीतायां उपर्युक्तविषयेषु किं वा नास्ति, विशेषतः क्लीबानां धार्ष्ट्यजननम्, उत्साहः शूनमानिनाम्, इति विषण्णस्य अर्जुनस्य उत्साहविवर्धनं कृत्वा धर्मयुद्धाय प्रोत्साहनमकरोत् नन्दनन्दनः।

सर्वोऽपि काव्यं नाम केवलं श्रृङ्गाररसप्रतिपादकं भवतीति मनुते।किन्तु काव्यं सुकुमारमतीनां अल्पधियामपि प्रबोधकं भवतीति अनया ज्ञातुं शक्यते।

प्रकृतमनुसरामः- यद्यप्यत्र भगवद्गीतायाः सम्यक् परिशीलनेन सर्वेऽपि काव्यप्रमेयाः समुपलभ्यन्ते अथापि ततः केवलं अलङ्कारविषयमात्रं प्रस्तौमि।

**अलङ्कारस्वरूपम्-**

अग्निपुराणे-

**संक्षेपात् वाक्यमिष्टार्थं व्यवच्छिन्नपदावली।**
**काव्यं स्फुरदलङ्कारं गुणवत् दोषवर्जितम्[11] ।।**

इति तथैव **काव्यं ग्राह्यम् अलङ्कारात्[12] । सौन्दर्यमलङ्कारः।** इति वामनाचार्चमतानुसारम् अलङ्काराणां प्राधान्यं विद्योतत एव। तत्र उपमादयः बहवो अलङ्काराः विलसन्ति। तत्र उपमालङ्कारस्य महत्वं सर्वैः अङ्गीकृतमेव।

**उपमैका शैलूषी सम्प्राप्ता चित्रभूमिका भेदात्।**
**रञ्जयति काव्यरङ्गे नृप्यन्ती तद्विदां चेतः[13] ।।**
**इति अप्पय्यदीक्षितस्य मतम्।**

उपमालङ्कारस्य लक्षणं तावत् सर्वैः ज्ञायते एव-

**उपमा यत्र सादृश्यलक्ष्मीः उल्लसति द्वयोः।**
**हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते[14] ।।**
**(कुवलायनन्दकारः)**

**मम्मटस्तु- साधर्म्यमुपमा भेदे[15]** इति लक्षणमुक्तवान्। यथा इव, सदृशं, तुल्य-मित्यादयः शब्दाः उपमावचकशब्दाः भवन्ति। तत्र भगवद्गीतायां श्रीकृष्णः पार्थ-मुद्दिश्य उद्बोधयन् तस्य सम्यगवमनार्थं व्यावहारिकोदाहरणानि प्रदर्शयति। एतदेव वस्तुतः कवेः कर्म।

**गीतायां प्रथमः श्लोकः-**

**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।**
**मामकाः पाण्डवाः चैव किमकुर्वत सञ्जय[16] ।। इति**

अत्र धर्मक्षेत्रे-कुरुक्षेत्रे इत्यत्र अनुप्रासालङ्काः। यमकालङ्कारोऽपि। मामकाः इति विशेषणदानेन परिकरालङ्कारः व्यज्यते। तेषां किं लक्षणं भवति- **वर्णसाम्यमनुप्रासः** इति

**परिकरालङ्कारः**

**विशेषणैः यत्साकूतैरुक्तिः परिकरस्तु सः। इति।**

अत्र धृतराष्ट्रस्य स्वार्थभावना व्यज्यते। मामकाः इति पाण्डवाः इति मामकाः विशिष्य साकूत्या उक्तवान्।
गीतायाः द्वितीये अध्याये षष्ठश्लोकः व्याघातालङ्कारप्रदर्शकः अस्ति। अर्जुन उवाच-

**न चैतद्विद्मः कतरन्नो गरीयो**
**यद्वा जयेम यदि वा नो जयेयुः।**
**यानेव हत्वा न जिजीविषामः**
**तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः[17] ।।**

अस्य अलङ्कारस्य लक्षणं तावत्-

**यद्यथा साधितं केनाप्यपरेण तदन्यथा।**
**तथैव यद्विधीयेत स व्याघात इति स्मृतः।।**

येनोपायेन यत् एकेनोपकल्पितं तस्य अन्योन्य जिगीषुतया तदुपायकमेव यत् अन्यताकरणं स साधितवस्तुव्याहतिहेतुत्वात् व्याघातः। तस्योदाहरणम्-

**दृश्य दग्दं मनसिजं जीवयन्ति दृशैव याः।**
**विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः।। इति**

विद्धसालभञ्जिकाक्षः मङ्गलश्लोकः अयम्। अत्र श्लोके जय विषये प्रस्तावः दृश्यते। वयं जेष्यामो वा ते जेष्यन्ति वा इत्यत्र। एवं प्रथमाध्याये द्वात्रिंशे श्लोके- अर्थापत्यलङ्कारः दृश्यते

**न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।**
**किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा[18] ।**

अस्य लक्षणं तावत् (चन्द्रालोके) **अर्थापत्तिः स्वयं सिद्ध्येत् पदार्थान्तरवर्णनम्। स जितः त्वन्मुखेनेनुः का वार्ता सरसीरुहा।** अत्र राज्यसुखादीनां जयेन को लाभः किं किं इति पदैः निर्दिश्यते।

**द्वितीये अध्याये दशमे श्लोके उत्प्रेक्षालङ्कारः**

**तमुवाच हृषीकेशः प्रहसन् इव भारत।**
**सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः[19] ।।**

**उत्प्रेक्षालश्रणम्-**

**सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।**

मन्ये शङ्के ध्रुवं प्रायः नूनम् इव इत्यादयः उत्प्रेक्षा द्योतकाः। अत्र प्रहसन् इव –परिहासं कुर्वन् इव उत्प्रेक्षा। ततश्च **अर्थान्तरन्यासालङ्कारः-**

**द्वितीये अध्याये –एकादशे श्लोके भगवानुवाच-**

**अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।**
**गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः[20] ।।**

एवमग्रे अष्टादशे अध्याये श्लोके-

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः[21]।।**
**जातस्य हि ध्रुवो मृत्युः मृतं जन्म मृतस्य च।**
**तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि [22]।।**

अस्य अलङ्कारस्य लक्षणं किम् इति चेत् काव्यप्रकाशे

**सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।**
**यत्तु सोऽर्थान्तरन्यासः सः साधर्म्येणेतरेण वा[23]।**

यत्र सामान्यं विशेषेण समर्थ्यते, अथवा एतत् तेन कुवलयानन्दे

**उदाहरणम्-**

**हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्। इति**

अत्र पण्डिताः नानुशोचन्ति इति कथनम्।
एवं कारणमालङ्कारः काव्यप्रकाशे-**यथोत्तरं चेत् पूर्वस्य पूर्वस्यार्थस्य हेतुना,** उत्तरं उत्तरं प्रति यथोत्तरं तदा कारणमाला स्यात्।

**उदाहरणम्-**

**जितेन्द्रियत्वं विनयस्य कारणम्**
**गुणप्रकर्षो विनयादवाप्यते।**
**गुणप्रकर्षेण जनोऽनुरज्यते**
**जनानुरागप्रभवा हि सम्पदः[24] ।।**

स्पष्टतया भगवद्गीतायां दृश्यते। द्वितीये अध्याये द्विषष्टि श्लोकात्-

**ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते**
**सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते.**
**क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।**
**स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति[25] ।।**

इति। अर्थः स्पष्ट एव। एवं बहवोऽलङ्काराः विद्यन्ते एव। उपमालङ्कारस्य उदाहरणानि बहूनि सन्ति। तत्र कानिचन।

**द्वितीये अध्याये द्वाविंशश्लोकः**

**वासांसि जीर्णानि यथा विहाय**
**नवानि गृह्णाति नरोऽपराणि।**
**तथा शरीराणि विहाय जीर्णा-**
**न्यन्यानि संयति नवानि देही[26]।। इति**

श्रौती-आर्थी इति उपमा द्विधा तत्र आर्थी उपमा-

**आश्चर्यवत्पश्यति कश्चिदेन**
**माश्चर्यवद्वदति तथैव चान्यः।**
**आश्चर्यवच्चैन मन्यः श्रृणोति**
**श्रुत्वाप्येनं वेद न चैव कश्चित्[27] ।। इति**

अर्थगता उपमा आर्थी। षड्चत्वारिंशत्तमः श्लोकः

**यावनर्थ-उदपाने सर्वतः संप्लुतोदके।**
**तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।**

अत्र यावान् तावान् अनुप्रासोऽप्यस्ति। 2-58 श्लोके-अष्टपञ्चाशत्तमे-

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता[28]।।**

अत्र इन्द्रियसङ्कोचः बुद्धेः एवं रसशब्दः प्रयुक्तोऽत्र- एष श्लोके

**विषया विनिवर्तन्ते निराहारस्य देहिनः।**
**रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते[29]।। इति**

रसो वै सः। रस---- भवति (अत्र यद्यपि रागः अर्थः) 2-67 श्लोके

**इन्द्रियाणां हि चरतां यन्मनः अनुविधीयते।**
**तदस्य हरति प्रज्ञां वायुः नावम् इवाम्भसि[30]।.**

इन्द्रियमनुधावति मनः तत् बुद्धिमाकर्षति यथा नौका-वायुना आकृष्यते।कीदृशं सिम्प्ली लोकोदाहरणम्। तृतीये अध्याये-36श्लोके-अर्जुनः पृच्छति

**अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।**
**अनिचछन् अपि वार्ष्णेय बलादि न नियोजितः[31]।।**

बलात् पापं करोति अनिच्छन् अपि केन चित् प्रेरित इव पापं करोति। तस्य समाधानं श्रीकृष्णः वदति उपमाद्वारा प्रदर्शयति च 38श्लोके

**धूमेना व्रियते वह्निः यथादर्शो मलेन च[32]।**

यथोल्बोनावृतो गर्भः तथा तेनेदमावृतम्। अद्भुतमेतदुदाहरणम्- यथा धूमेन वह्निः आव्रियते, यथा च दर्पणः मलेन यथा च उल्बेन आवृतो गर्भः, तथा तेन कामेन इदं जन्तुजातम् आवृतमस्ति इति।

एवं षष्ठे अध्याये -19श्लोकः

**यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।**
**योगिनो यतचित्तस् युञ्जातो योगमात्मनः[33]।।**

यथा निवातस्थो- वायुरहितस्थाने स्थितः दीपः न इङ्गते न चलति न काम्यते, तथा यतचित्तस्य निवृत्तसकलेतरमनोवृत्तेः योगिनः आत्मनि योगं युञ्जतः आत्मस्वरूपस्य सा उपमा। अर्थात् आत्मा अचलरूपेण योगिनां चित्ते तिष्ठति।

**रूपकालङ्कारः- 4-2 अध्याये -42 श्लोकः**

**यामिमां पुष्पितां वाचं**
**प्रवदन्त्यविपश्चितः।। इति**

**श्रुत्यलङ्कारः-**

**न जायते म्रियते वा विपश्चित्[34]-**

एवं गीतायां काव्यतत्वानि बहुधा दृश्यन्ते। अत्र अलङ्कारनिरूपणे एव प्रयासः कृतःष इतोऽपि अन्येषु विषयेष्वपि प्रयासः करणीय एव। एवञ्च मम दृष्टौ भगवद्गीता एकमुत्तमं काव्यं भवतीति उक्त्वा विरमामि विस्तरात्।

**अनुप्रासालङ्कारः-**

**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते[35] ।।**

**सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ[36]।।**
**अत्र श्रुत्यनुप्रासालङ्कारः।**
**यावानर्थ उदपाने सर्वतः सम्प्लुतोदके[37]।**

**स्वभावोक्त्यलङ्कारः-**

**एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।**
**स्थित्वास्यामन्तकालेऽपि ब्रह्म निर्वाणमृच्छति[38] ।।**
**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्[39]।।**

**स्मरणालङ्कारः-**

**बहूनि मे व्यतीतानि जन्मानि तव च अर्जुन।**
**तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप[40] ।।**

**सन्देहालङ्कारः-**

**किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः।**
**तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्[41] ।।**

**यमकालङ्कारः-**

**श्रोत्रादीन् इन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।**
**शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति[42]।।**
**आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।**
**योगारूढस्य तस्यैव शमः कारणमुच्यते[43]।।**

वस्तुतः गीतायां काव्यतत्वानि बहुधा दृश्यन्ते।अत्र अलङ्कारनिरूपणे एव प्रयासः कृतः। इतोऽपि अन्येषु विषयेष्वपि प्रयासः करणीय एव। एवञ्च भगवद्गीता एकमुत्तमं काव्यं भवतीति ममाभिप्रायम् आविष्कृत्ये विरमामि विस्तरात्।

**परिशीलितग्रन्थसूची**


1.अग्निपुराणम्-आचार्यबलदेवोपाध्यायः चौखाम्बा संस्कृत- संस्थानम् वाराणसी
2.इतिहासपुराणाख्यानसङ्ग्रहःराधावल्लभत्रिपाठी,साहित्य अकादमी नयीदिल्ली
3.देवीभागवतम्-सुब्रमण्यशास्त्री वेङ्कटेश्वर आर्ष-भारतीय ट्रस्ट् हैदराबाद्
4.महाभारतम्-नाग् पब्लिकेशन् दिल्ली
5.पुराणेतिहासविमर्शः-भारतीयविद्याप्रकाशनम् दिल्ली
6.पुराणपर्यालोचनम्-चौखाम्बासुरभारती प्रकाशन् वाराणसी
7.पुराणविमर्शः-चौखाम्बविद्याभवन् वाराणसी
8.पुराणपरिचयः-शारदापब्लिकेशन् तिरुपतिः
9.महाभारतम्-बि.वो.आर् इन्सिटिट्यूट् पूना
10.विष्णुपुराणम-नाग् पब्लिकेशन् दिल्ली
11.काव्यप्रकाशः-चौखाम्बासुरभारती प्रकाशन् वाराणसी
12.कठोपनिषत्-नाग् पब्लिकेशन् दिल्ली
13.गीतारत्नाकरम्-स्नेहश्री आर्गनैजेषन् तेनालि
14.कुवलयानन्दः-चौखाम्बासुरभारती प्रकाशन् वाराणसी
15.वराहपुराणम्-नाग् पब्लिकेशन् दिल्ली
16.स्कान्दपुराणम्-नाग् पब्लिकेशन् दिल्ली

17.अलङ्कारमञ्जरी-चौखाम्बासुरभारती प्रकाशन् वाराणसी

**संदर्भ ग्रन्थ सूचि:-**

1. स्का.पु.गी.मा.
2. गीता 18-73
3. गीता. 15/20
4. वराहपुराणम्
5. महाभारते भीष्मपर्वणि 43अध्याये वैशम्पायनः एवं वदति।
6. काव्य.प्र. 1
7. सा.द 1
8. अलङ्कार. म
9. साहित्यदर्पणः 1
10. नाट्य-शा 2-6
11. अ.पु
12. काव्या.सू
13. चित्र.मी
14. कुवलयानन्दः 1-1
15. काव्य.प्र 7
16. गीता 1-1
17. गीता. 2-6
18. गीता. 1-31
19. गीता.2.10
20. गीता 2.11
21. गीता 18-66
22. गीता 2-27
23. का.प्र
24. का.प्र. 7उल्लासः
25. गीता. 2-62श्लोकः
26. गीता 2-22श्लोकः
27. कु.ल.न
28. गीता 2-58
29. गीता 2-59
30. गीता 2-67
31. गीता 3-36
32. गीता 3-38
33. गीता 6-19
34. कठोपनिषत्
35. गीता 2-15
36. गीता 2-38
37. गीता 2-46
38. गीता 2-72
39. गीता 4-7
40. गीता 4-5
41. गीता 4-16
42. गीता 4-16
43. गीता 6-3